# सुरवाणीसमाराधकेभ्यः स्वागतम्



डा. कं.कादम्बिनी
सहायकाचार्या
रा. सं. विद्यापीठम्, तिरुपतिः

# अथ चतुर्थीविभक्तिः

# दानक्रियायां स्वीकर्तुः चतुर्थीविभक्तिः

यत्र दानक्रिया अस्ति तत्र, यस्मै वयं किमपि दद्मः तस्य चतुर्थीविभक्तिः भवति।

यथा

- बलिः वामनाय भूमिं दत्तवान्।
- रामः मित्राय उपायनं दत्तवान्।
- रमा सखीभ्यः पानीयं दत्तवती।
- सीता सर्वेभ्यः मधुरं दत्तवती।

ii. रमा केभ्यः किं दत्तवती इति लिखन्तु ।

| | | | |
|---|---|---|---|
| रमा | भिक्षुकाः<br>सख्यः<br>सर्वे<br>ते<br>महिला<br>बान्धवाः | नाणकानि<br>मधुरम्<br>पानीयम्<br>उपाहारम्<br>फलम्<br>ताम्बूलम् | दत्तवती |

# रामः कस्मै किं दत्तवान्


| | | | |
|---|---|---|---|
| रामः | पुत्रः | युतकवस्त्रं | दत्तवान् |
| | पुत्री | शाटिका | |
| | मित्रं | पुस्तकानि | |
| | पत्नी | धनम् | |
| | कर्मकरी | वेतनम् | |
| | सेविका | उपायनम् | |
| | भगिनी | कण्ठहारम् | |

कृष्णः एकस्मै किञ्चित् दर्शयति, अन्यस्मै अन्यत् दर्शयति। सः कस्मै किं दर्शयति इति अधः निर्दिष्टम् अस्ति । तदाधारेण सर्वनामशब्दानां चतुर्थीविभक्तिं योजयन्तः वाक्यानि रचयन्तु।

| | | |
|---|---|---|
| १. | सः – चित्रम् | एष – पत्रिकाम् |
| २. | सा – शाटिका | एषा – कण्ठहारः |
| ३. | भवान् – ग्रामः | भवती – नगरम् |
| ४. | एते – यक्षगानम् | ते – चलनचित्रम् |
| ५. | एताः – नृत्यम् | ताः – नाटकम् |
| ६. | भवन्तः – विद्यालयः | भवत्यः – कार्यालयाः |
| ७. | अहम् – चित्रकथापुस्तकम् | वयम् – क्रीडनकानि |

# रोचते इति क्रियापदस्य प्रयोगे चतुर्थीविभक्तिः

- रामाय मधुरं रोचते ।
- सीतायै पठनं रोचते।
- अध्यापकेभ्यः कलहं न रोचते।
- ग्रामीणेभ्यः नगरं न रोचते।


कार्यम्
पठनम्
लेखनम्
राम:
भगिनी
सीता
नलिनी
मीना
सीमा
रोचते
न रोचते
न रोचते
न रोचते
रोचते
रोचते
रोचते

# नमः शब्दस्य योगे चतुर्थीविभक्तिः

- नमः शब्दस्य प्रयोगः यत्र तस्य चतुर्थीविभक्तिः भवति।
- यथा
  - देवाय नमः।
  - रामाय नमः।
  - दुर्गायै नमः।
  - कृष्णाय नमः।

# क्रोधादीनां पात्रस्य चतुर्थीविभक्तिः भवति

- क्रुध्यति, कुप्यति, असूयति, ईर्ष्यति, द्रुह्यति इत्येतेषां धातूनां प्रयोगे क्रोधादीनां पात्रस्य चतुर्थीविभक्तिः भवति।
- यथा
  - रामः रावणाय क्रुध्यति।
  - कृष्णः शिशुपालाय कुप्यति।
  - राकेशः गोविन्दाय असूयति।

# कल्पते  इति क्रियापदस्य योगे चतुर्थीविभक्तिः भवति (कल्पते इत्यर्थे भवति इत्यपि प्रयोगः)

- भक्तिः ज्ञानाय कल्पते।
- प्रतिदिनं प्रातः उत्थानम् आरोग्याय कल्पते।
- चर्चा विवादाय मा भवतु।
- गुरूणाम् उपदेशस्य श्रवणं हिताय भवति।

# हितशब्दप्रयोगे चतुर्थीविभक्तिः भवति

- यथा
  - बालाय हितं क्षीरम्।
  - मानवेभ्यः हितं पौष्टिकाहारः।

# चतुर्थीविभक्तेः प्रयोगः

- दानक्रियायां स्वीकर्तुः
- रोचते इति क्रियापदस्य प्रयोगे
- नमः शब्दस्य योगे
- क्रोधादीनां पात्रस्य
- कल्पते  इति क्रियापदस्य योगे
- हितशब्दप्रयोगे च चतुर्थीविभक्तिः भवति

# धन्यवादः